# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-1) | **प्रश्नपत्रम्–५** (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड- CE- 4.1.1.** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १९/१२/२०१८ | **सन्दर्भग्रन्थः**– पुराणविमर्शः | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ एकस्य सप्रसङ्गं व्याख्या कार्या ।** **०५**

१. इतिहासपुराणाभ्यां वेदं समुपवृंहयेत् ।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ॥

२. धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।
पूर्ववृत्तकथायुक्तामितिहासं प्रचक्षते ॥

**प्र–२ कस्याप्येकस्य सविस्तरणोत्तरं लिखत ।** **१०**

१. शुकदेवस्य परिचयं दत्वा पुराणानां नामानि लिखत ।

२. श्रीद्भागवतपुराणस्य महापुराणत्वं ग्रन्थोक्तदिशा लिखत ।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ एकस्य सप्रसङ्गं व्याख्या कार्या ।** **०५**

१. सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥

२. मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश ॥

**प्र–४ एकस्य निबन्धात्मकमुत्तंर लिखत ।** **१०**

१. अष्टादशपुराणानां परिचयं लिखत ।

२. पुराणस्य दशलक्षणानां परिचयं लिखत ।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य सप्रसङ्गं व्याख्या कार्या ।** **०५**

१. स एव प्रथमं देवः कौमारं सर्गमास्थितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥

२. भरणात् प्रजानान्नैव मनुर्भरत उच्यते ।
निरुक्तयमनैश्चैव वर्षं तद् भारतं स्मृतम् ॥

**प्र-६ एकस्य विस्तरेणोत्तरं लिखत ।** **१०**

१. ग्रन्थानुसारं तीर्थमाहात्म्यं विलिख्य मन्वन्तराणां नामानि लिखत ।

२. वर्णव्यवस्थां विलिख्य तद् धर्मान् लिखत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ एकस्य सप्रसङ्गं व्याख्या कार्या ।** **०५**

१. अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥

२. स एवाहं महादेवः स एवाहं जनार्दन ।
उभयोरन्तरं नास्ति घटस्थजलयोरिव ॥

**प्र-८ एकस्य विस्तरेणोत्तरं लिखत ।** **१०**

१. वेदपुराणप्रोक्तानां मुख्यदेवानां महत्वं प्रतिपादयत ।

२. पौराणिकसृष्टितत्वम् – इति विषये सविस्तरं लिखत ।

**प्र-९ दशप्रश्नानामुत्तराणि लिखत ।** **१०**

१. व्यासस्य वचनद्वयं लिखत ।

२. कति आश्रमाः सन्ति?

३. भागवते कति अध्यायाः सन्ति?

४. विद्यावतां कुत्र परीक्षा?

५. कति पुराणानि सन्ति?

६. भागवतस्य दशमे स्कन्धे कति अध्यायाः सन्ति?

७. ब्राह्मणस्य कति कर्माणि?

८. 'व' चतुष्टयं लिखत ।

९. पुराणविमर्श ग्रन्थासनुसारं कति विचित्रविद्याः सन्ति?

१०. ययातेः कति पुत्राः?

११. वायुपुराणे कति अध्यायाः सन्ति?

१२. मुनिः – अर्थात् किम्?

१३. योगस्य कति अङ्गानि सन्ति?

१४. पुराणम् – इति शब्दस्य निर्वचनं किम्?

१५. वेदव्यासस्य पुत्रस्य किं नाम?

--००--